श्री त्रिपुरसुंदरी दंडकं

श्री त्रिपुरसुंदरी दंडकं

जयति निजसुधांभः संभवा वाग्भवश्रीः
अथ सरस समुद्यत् कामतत्त्वानुभावा |
तदनु परमधाम ध्यानसंलक्ष्य मोक्षा
रवि शशि शिखिरूपा त्रैपुरी मंत्रशक्तिः || 1 ||

जय जय जगदेकमातर्नमश्चंद्र चूडेंद्र सोपेंद्र पद्मोद्भवोष्णांशु शीतांशु शिखि पवन यम धनद दनुजेंद्रपति वरुणप्रमुख सकल सुर मुकुटमणि निचयकर निकर परिजनित पुर विविध रुचिरुचिर कुसुमचय बुद्धिलुब्ध भ्रमद्भ्रमरमाला निनादानुगत मंजुशिंजान मंजीरकल कनकमय किंकिणी क्वाणयन् नृत्यदुद्दाम निभृतपदललित किंकरालंकृत सुचंक्रमण लीले सुलीले, स्थलांभोज निभचरण नखरत्न कांतिच्छलेन हरनयन हव्याशनप्रतिकृतानंग विजयश्रिया असौ भवत्या भव इव शरणागतः पादमूले समालीन इवालक्ष्यते सुलक्ष्यते, ललित लावण्यतरु कंदली सुभग जंघालते चिल्लते || 2 ||

गलित कलधौत प्रभोरुद्युते सुद्युते विद्युदुद्योत माणिक्य बंधोज्ज्वलानर्घ कांची
कलापानुसंयमित सुनितंब बिंबस्थले सुस्थले || 3 ||

स्मरद्विरद परिरचित नवरोमराज्यंकुशे निरंकुशे || 4 ||

दक्षिणावर्त नाभिभ्रमत्रिवलितट परिलुठित ललित लावण्यरस सुरनिम्नगा भूषित सुमध्य देशे सुदेशे, स्फुरत्तार हारावली गगन गंगातरंग व्रजालिंगितोत्तुंग निबिडस्तन सौवर्ण
गिरिशिखर युग्मे अयुग्मे उमे || 5 ||

मुरारिकर कंबुरेखानुगत कंठपीठे सुपीठे, लसत् सरळ सविलास भुजयुगळ परिहसित
नवकोमल मृणाले सुनाले || 6 ||

महार्हमणिवलयज मयूखचय मांसल करकमल नखरत्न किरणे जितरणे सुकरणे सुशरणे || 7 ||

स्फुरत् पद्मरागेंद्र मणिकुंडलोल्लसित कांतिच्छटोच्छुरित गंडस्थली रचित कस्तूरिका पत्ररेखा समुद्भात सुनासीर गांडीव शोभे सुशोभे || 8 ||

महासिद्ध गंधर्वगण किन्नरी तुंबुरु प्रमुख वररचित वरविविध पदमंगळानंग संगीत सुखश्रवण संपूर्णकर्णे जय स्वामिनि || 9 ||

शशि शकल सुगंधि तांबूल परिपूर्णमुखि सुमुखि || 10 ||

बालप्रवाल प्रभाधर दलोपांत विश्रांत दंतद्युति द्योतिताशोक नवपल्लवासक्त शरदिंदु करनिकर सांद्रप्रभे सुप्रभे देवि || 11 ||

विश्वकर्मादि निर्माण विधि सूत्र सुस्पष्ट नासाग्र रेखे सुरेखे || 12 ||

कपोलतल कांतिविभवेन न विभांति नश्यंति यांति धावंति तेजांसि च तमांसि च विमलतर तरलतर तारकानंग लीला विलासोल्लसत् कर्णमूलांत विश्रांत विपुलेक्षणाक्षेप विक्षिप्त
रुचिरचित नवकुंद नीलांबुजप्रकर परिभूषिताशावकाशे सुकाशे || 13 ||

चलद्भ्रूलता विजित कंदर्पकोदंड भंगे सुभंगे || 14 ||

मिलन्मध्यमृगनाभिमय बिंदुपद चंद्रतिलकायमानेक्षणालंकृतार्धेंदु रोचिल्ललाटे सुलाटे || 15 ||

लसद्भंशमणि जालकांतरित वर चलत् कुंतलांतानुगत कुंदमालानुषक्त भ्रमद्भ्रमर पंक्ते सुपंक्ते || 16 ||

वहद्बहळ परिमळ मनोहारि नवमालिका मल्लिका मालती केतकी चंपकेंदीवरोदार मंदार मालानु संग्रथित
धम्मिल्लमूर्धावनद्धेंदु करसंचयोयं गगनतल संचरोयं यशश्चत्र रूपः
सदा दृश्यते ते शिवे || 17 ||

यस्य मधुरस्मित ज्योतिषा पूर्णहरिणांकलक्ष्मीः क्षणाक्षेप विक्षिप्यते तस्य मुखपुंडरीकस्य कविभिः कदा कोपमा केन कस्मिन् कथं दीयते || 18 ||

स्फुट स्फटिक घटिताक्षसूत्र नक्षत्रचय चक्रपरिवर्तन विनोद संदर्शित निशासमयचारे सुचारे, महाज्ञानमय पुस्तकं हस्तपद्मे अत्र वामे दधत्या भवत्या तदा सुस्फुटं वाममार्गस्य सर्वोत्तमत्त्वं समुपदिष्यते || 19 ||

दिव्यमुखसौरभे योगपर्यंक बद्धासने सुवदने सुरसने सुदर्शने सुमदने सुहसने सुरेशि जननि तुभ्यं नमो जय जननि तुभ्यं नमो जय जननि तुभ्यं नमः || 20 ||

अ इ उ ऋ लु* इति लघुतया तदनु दैर्घ्येण पंचैव योनिस्तथा वाग्भवं प्रणव औ बिंदुरः, क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह ळ इति सुबद्ध रुद्रात्मिकां अमृतकर किरणगण वर्षिणीं मातृकां उद्गिरंती हसंती लसंती वसंती तदा तत्र कमलवन भवनभूमौ भवंती भवभेदिनी भयभंजिनी
सभूर्भुवःस्वर्भुवनमूर्ति भव्ये सुभव्ये सुकाव्ये || 21 ||

सुकृतिना येन संभाव्यसे तस्य जर्जरित जरसोविरजसोऽपि पुत्रीकृतार्कस्य सत्तर्क पदवाक्य आगम वेद वेदांग वेदांत सिद्धांत सौर शैवादि वैष्णव पुराणेतिहास स्मृति गारुड भूततंत्र स्वरोदय ज्योतिषायुर्वेद नानाख्यान पाताळशास्त्रार्थ मंत्रशिक्षादिकं विविध विद्याकुलं लिखित पदगुंफ संबंध रस सत्कांति सोदार भणित प्रबंध प्रभूतार्थ समालंकृताशेष भाषा महाकाव्य लीलोदयासिद्धि रूपयाति सद्य अंबिके || 22 ||

वाग्भवेनैकेन वाग्देवि वागीश्वरो जायते किन्नुकिल कामाक्षरेण सकृदुच्चरितेनैव तव साधको बाधको भवति भुवि सर्व शृंगारिणां तन्नयनपथ पतित नेत्रनीलोत्पला झटिति यदि
सिद्ध गंधर्वगण सुंदरी ललितवरविद्याधरी वा सुरीवामरीवा महीनाथनाथांगना वा
ज्वलन्मदन शरनिकर दलित संक्षोभिता निगडितेव ज्वलितेव स्खलितेव मुषितेव संपद्यते, शक्तिबीजैक संध्यायिनां योगिनां भोगिनां वैनतेयायते दाहिनां अमृतमेघायते दुस्सहविषाणां निशानाथचूडायते ध्यायते धार्यते येनबीजत्रयं तस्यनाम्नैव पशुपाशमलपंजरं तृट्यति तदाज्ञया सिद्ध्यति च गुणाष्टकं भक्तिभाजां महाभैरवि कवलित सकलतत्त्वात्मिके सुस्वरूपे सुरूपे परिणतशिवायं त्वायि तदा कः परः शिष्यते, का क्रिया शिष्यते यदि त्वद्भक्तिहीनस्य तत्वस्य का अर्थक्रिया कारिता तदिति तस्मिन् विधौ तस्य किं धाम किं नाम किं कर्म किं शर्म किं नर्म किं वर्म किं धर्म का गतिः का रतिः का मतिः किं वर्जनीयं च || 23 ||

झटिति यदि सर्वशून्यांतर्भूमौ निजेच्छा समुन्मेष समयं समासाद्य बालार्क कोट्यंशरूपा विगर्भीकृताशेष संसार बीजाऽनुबद्धासि कंदं तदा त्वं अंबिका गीयसे तदनु परिजनित कुटिलाग्र तेजोऽंकुरा जननि वामेति संस्तूयसे, ततः बद्ध सुस्पष्ट रेखा शिखा ज्येष्ठेति संभाव्यसे, सैव शृंगाटकाकारतां आगता तदा रौद्रीति विख्याप्यसे || 24 ||

ताश्च वामादिकास्वत् कलास्त्रीन् गुणान् संदधत्यः क्रिया ज्ञानचय वांछा स्वरूपाः क्रमात् तामरसजन्म मधुमथन पुरवैरिणां बीजभावं भजंत्यः सृजंत्यस्त्रिभुवनं त्रिपुरसुंदरी इति तेन संकीर्त्यसे || 25 ||

तत्र शृंगाटपीठोल्लसत् कुंडलाकार तेजो कुलात् प्रोल्लसंती सगंधी शिवार्कं समास्कंद्य चांद्रं महामंडलं द्रावयंती पिबंती सुधां कुलवधूः कुलं परित्यज्य परपुरुष कुलीनमवलंब्य विश्वं परिभ्राम्य सर्वस्वमाक्रम्य तेनैव मार्गेण निजकुलनिवासं समागत्य संतुष्यसीति प्रियः कः पतिः कः प्रभुः कोऽस्तु तेनैव जानीमहे हे महेशानि रमसे च कामेश्वरी कामगिर्यालयेऽनंगकुसुमादिभिः सेविता तदुपरि जालंधरपीठे वज्रपीठेषु वज्रेश्वरी परिजनान्नटयसि पुनः पूर्णगिरिगह्वरे नग्नवसनार्चिते भगमालिनी विलससि देवि ज्वलन्ममदन शरनिकर मधु विकसित समद मधुकर कदंब विपिन विभवे भगवति
श्री त्रिपुरसुंदरि श्री ओड्याणपीठे नमस्ते नमस्ते नमस्ते नमस्ते शिवे || 26 ||

इति श्रीत्रिपुरसुंदरीचरण किंकिणीशिंजितं
महाप्रणति दीपकं त्रिपुरसुंदरीदंडकं |
इमं भजति भक्तिमान् पठति यः सुधीः साधकः
स चाष्टगुण संपदां भवतु भाजनं सर्वदा || 27 ||

सौधांबुधावरुणपोत सुवर्णशैल
कादंब दिव्यवन मध्यम वर्णभूमौ |
भास्वत् विचित्रमणि मंडप दिव्यपीठ-
-मध्यस्थितां भुवनमातरमाश्रयामि || 28 ||

ब्रह्मेंद्र रुद्र हरि चंद्र सहस्ररश्मि-
-स्कंद द्विपानन हुताशन वंदितायै |
वागीश्वरि त्रिभुवनेश्वरि विश्वमात-
-रंतर्बहिश्च कृत संस्थितये नमस्ते || 29 ||

इति श्रीदीपकनाथसिद्ध विरचितं श्री त्रिपुरसुंदरी दंडकं |